पीत्वा जीवन्ति सर्वजन्तवः। पीत्वाऽमृतं तथा सोमात् तृप्यन्ते सर्वदेवताः। सम्भृतं सर्वयागेषु तथायं क्षरते शशी। तं क्षरन्तं यथाभागमुपजीवन्ति देवताः। तस्मिन् काले समभ्येति राहुरप्यवकर्षति। सर्वमर्द्धं त्रिभागञ्च पादं पादार्द्धमेव च। आक्रम्य पार्थिवीं छायां यावन्तं चन्द्रमण्डलम्। स्वतः स भागो राहोस्तु देवभागास्तु शेषकाः। तांस्तु विधाय देवानां राहोः पर्वगतस्य च। चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते। तिथिभागाश्च यावन्तः पुनस्त्यर्कं प्रमाणतः। पर्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः। अतो राहुभुजः सोमः सोमवृद्धिर्दिवाकरात्। पर्वकाले स्थितिस्त्वेवं विपरीता पुनः पुनः। अतश्छादयते राहुरम्बरच्छशिभास्करौ। राहुरम्बरसंस्थानः सोममाच्छाद्य तिष्ठति। उद्धृत्य पार्थिवीं छायां धूममेघ इवोत्थितः। चन्द्रस्य यद्वदृष्टं राहुणा भास्करस्य च। तन्मात्रखण्डितं तस्य केवलं श्यामलीकृतम्। कर्दमेन यथा वस्त्रं शुक्लमप्युपहन्यते। एकदेशोऽथ सर्वं वा राहुणा चन्द्रमास्तथा। प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत्। राहुत्यक्तं भवेत्तद्वत् निर्मलं चन्द्रमण्डलम्। राहुणा छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ। विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम्। एवं न गृह्यते सूर्य्यश्चन्द्रमास्तत्र गृह्यते। अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः। जगत्सम्मोहनञ्चैतत् ग्रहणं चन्द्रसूर्य्ययोः"।

**सोपाधि(क)** सह उपाधिना वा कप् सादेशः। उपाधियुक्ते प्रतिलाभाशया कृतदानादौ।

**सोपान** न० उप–अन–भावे घञ् सह विद्यमानः उपानः उपरि गतिरनेन। आरोहणसाधने काष्ठादिनिर्म्मिते (पैठा) प्रकृतौ पदार्थे अमरः।

**सोभाञ्जन** पु० शोभाञ्जन+पृषो०। (शजना) वृक्षे भरतः।

**सोम** पु० सु–मन्। १चन्द्रे २कर्पूरे अमरः। ३कुबेरे ४यमे ५वायौ ६वसुभेदे ७जले ८सोमलतौषधौ ९वानरे मेदि० १०सोमरसे हेमच० ११अमृते १२दीधितौ उणा०। सह उ(उ)मया। १३शिवे १४वानरेशे सुग्रीवे च।

सोमस्य ग्रहभेदः तत्कक्षामानादिकं खगोलशब्दे ४२२५ पृ०दृश्यम्। तत्प्रकृत्यादिकं यथा

"चन्द्रः सिताङ्गसमगात्रयष्टिवाग्मी परिष्यङ्गविवेकयुक्तः। क्वचित् कृशः शीतलवाक्ययुक्तः सत्त्वाश्रयो वातकफानिलात्मा" सर्वार्थचि०। स च वायव्या दिशः वैश्यजातिः स्त्रीग्रहः लवणरसस्तृणगिरो नक्षत्राणामधीशः। ग्रहयज्ञशब्दे तन्मन्त्रादिकं दृश्यम्। तस्य जन्मकाले मेषादिराशिषु स्थितिभेदे फलभेदः वृहज्जातकोक्तः ३०८७ पृ० जातकशब्दे उक्तः। लग्नादिस्थस्य तस्य फलं जातकपद्धतावुक्तं यथा

"चन्द्रे स्वभाजहषगे तनुगे गुणाढ्यो दाक्षिण्यरूपधनवाक्सकले विशेषात्। अन्येषु भेषु तनुगे विकलश्च शूरः प्रोन्मत्तनीचबधिरः क्षयभाग्यवश्यः। कुटुम्ब२स्थिते कैरवाणामधीशे भवेत् पुत्रमित्रार्थसौख्यैः समृद्धः। नरः पूर्णदेहे तु हीने विलोमं स्खलद्वाक् च बोध्यं फलं तारतम्यात्। द्विजाधिराजे सहजे३ऽतिलोभः कार्पण्यवान् संप्रहृतश्च नीचः। हर्षान्वितो भ्रातृजनाश्रयश्च प्रकाशितः स्यात् मनुजोऽतिहिंस्रः। पाताल४संस्थे सति शीतलांशौ जलप्रयाणाभिरतिर्नरः स्यात्। दाता सुहृद्वाहनसेवकाढ्यः सुखी सुखोत्कर्षयुतः सुभूषः। सुते५ समुद्रस्य सुते प्रसूतौ धीमित्रपुत्रैर्बहुभिः समेतः। शूरो नरः स्याद्बहुधान्यमित्रसत्साहकः क्षीणतरः सुखाढ्यः। शत्रौ६गतौ पद्मिनीनां स्थिते ना शत्रुव्रातैः संयुतो दारुणश्च। माराग्निभ्यामल्पकाभ्याञ्च युक्तोऽनल्पालस्यः स्याच्च नीरोदराढ्यः। शशिनि शशिमुखी-निकेतन७स्थे भवति सुखी मदनातुरः सुदेहः। अति-मतिरनसूयकोऽप्यष्टष्यो मलिततनौ बहुरोगदैन्यतप्तः। मृत्यौ८मृगाङ्के मतिमान्नरः स्यादोजस्वितादयोऽपि च बन्धनाद्यैः। सुक्षीणदेहः सति हीनदेहे तस्मिन् भवेदल्पकजीवितश्च। निशाधिनाथे नवमालय९स्थे धीपुत्रमित्रद्रविणोपपन्नः। सौभाग्यसौख्यैः सुकृतैर्युतः स्यात् कान्ताजनेष्टोमनुजो दयावान्। दशम१०धाम्नि सुशीतलधाम्नि द्रविणधीसुकृतैः सहितः शुचिः। भवति कर्मपरोऽपि च सिद्धिभाङ्नरवरो न विषादकरो भवेत्। आयं११याते यामिनीनायके ना मित्रक्षेत्रद्रव्यपुत्रायुक्तः। ख्यातः शूरो दारुणस्वाभिमानी शिष्टैर्भृत्यैरन्वितो बुद्धिमान् स्यात्। शीतांशौ द्वादशे१२द्वेष्यो हीनाङ्गो नेत्ररोगवान्। पतितः परमः क्रुद्धः परिभूतो नरो भवेत्"।

सोमलता च ओषधिभेदः सोमवल्लीरूपा ओषधिशब्दे १५६४ पृ० सुश्रुतवाक्ये तल्लक्षणादि दृश्यम्। सोमेन यजेतेत्यादि श्रुत्युक्ते १५यागभेदे पु०। सोमयागेतिकर्त्तव्यतादि कात्या०श्रौ० २५अ०। १०काण्डकादौ दृश्यम्। कात्यायनशब्दे १८७६पृ० तत्प्रतिनिधिद्रव्यादि दर्शितम्।